**Series OSS**

Code No. **49**
कोड नं.

Roll No.
रोल नं.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the student will read the question paper only and will not write any answer on the answer script during this period.
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

1. *उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि ।*

   *उत्तर उत्तर-पुस्तिका में ही लिखें ।*

   *Write answers in the answer-sheet only.*

2. *संकेताभावे सर्वेषा प्रश्नानामुत्तराणि संस्कृतनैव लेखनीयानि ।*

   *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

   *Answer all questions in Sanskrit unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य च परिचयः (पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*15 अंकाः*

1. अधोलिखितम् अनुच्छेदद्**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :
अधोलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following **two** passages and answer the given questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

अयम् अस्माकं देशः, वयम् अस्य पुत्राः । अतो वयं परस्परं भ्रातरः । एकम् अस्माकं शासनम् । एकोऽस्मद्राष्ट्रपतिः, एकश्चैव प्रधानमन्त्री । संविधानमप्येकं येन शासनयन्त्रं चाल्यते । यदि देशोऽस्माकं समृद्धो भविष्यति तर्हि सर्वे देशीयाः समृद्धा भविष्यन्ति । यदि अस्मद्देशः सम्मानं लप्स्यते तर्हि निवासिनोऽत्रत्याः सम्मानिता भविष्यन्ति । यदि कश्चिद् वैदेशिकः समागमिष्यति तर्हि स सम्प्रदाय-जाति-प्रदेशभाषादिकारणात्र परिचेष्यति कमपि ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. *$\frac{1}{2}\times2=1$*

(i) वयं परस्परं के ?

(ii) देशे सम्मानिते के सम्मानिता भविष्यन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. *$2\times1=2$*

यदि कश्चिद् वैदेशिकः समागमिष्यति तर्हि स किं करिष्यति ?

(स) यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. *$\frac{1}{2}\times4=2$*

(i) 'अपमानिताः' इति पदस्य विलोमपदं किमत्र प्रयुक्तम् ?

(ii) 'देशीयाः' इति पदस्य विशेषणं किम् ?

(iii) 'यदि देशोऽस्माकं समृद्धो भविष्यति' अस्मिन् वाक्ये 'अस्माकम्' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

(iv) 'लप्स्यते' इति क्रियायाः कर्तृपदं किम् ?

(ख) **द्वितीयः अनुच्छेदः**

विठ्ठलभाईपटेलमहोदयः वाक्कीलतां व्यवसायं न अमन्यत परं सामाजिकसेवाम् अजानात् । एकदा पटेलो मुम्बईनगरे कस्यापि अभियोगस्य पक्षे स्वकार्यम् अकरोत् । फौजदार्याः महान् अभियोग आसीत् । लेशमात्र-त्रुट्या स मृत्युदण्डं प्राप्तुं विवशः अभवत् । पटेलोऽभियोगे स्वपक्षमस्थापयत् तदैव कोऽपि जनः तस्मै पत्रमेकमयच्छत् । पटेलः पत्रं पठित्वा वादे लीनः संजातः । कमपि भावं न प्रकटितवान् । स्वतर्कशक्त्या साक्ष्येण च सः स्वपक्षमजयत् । न्यायालयाद् बहिः आगतं तं यदा तस्य मित्रं पत्र-विषयेऽपृच्छत् तदा सोऽसूचयत् यत् पत्रे तस्य पत्न्याः मृत्योः सूचनाऽस्ति । तन्मित्रमपृच्छत् पत्न्याः मृत्योः सूचनां प्राप्यापि भवता न्यायालये वादो न त्यक्तः, कथमपि कष्टभावो न लब्धः । गभीरवचसा पटेलः प्रत्युत्तरं ददौ — 'पत्नी तु गता परं कथं मेऽभियोज्योऽपि मृत्युमाप्नुयात्' ? पटेलस्य मित्रम् अवाक् अभवत् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) पटेलो वाक्कीलतां काममन्यत ?

(ii) पटेलः कुत्र अभियोगस्य व्यवसायमकरोत् ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

पटेलः मित्रं किमुत्तरम् अयच्छत् ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'अभ्यन्तर' — पदस्य विलोमपदं किमत्र प्रयुक्तम् ?

(ii) 'अधिगत्य' — अस्य कः पर्यायः अत्र प्रयुक्तः ?

(iii) 'तस्य मित्रं पत्र-विषयेऽपृच्छत्' — अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'महान् अभियोगः आसीत्' — अत्र विशेषणं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. 2

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit

*15 अंकाः*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा लिखत :
मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा कर लिखिए :
Complete and rewrite the following story, taking help from the words given in the box below : *1×10=10*

कथा

वाराणस्यां कर्पूरपटको नाम रजकः अवसत् । एकदा रात्रौ स गाढं प्रसुप्तः अभवत् । तस्य गृहे कश्चित् (i) __________ प्रविष्टः । रजकस्य प्रांगणे एकः गर्दभः, एकः कुक्कुरः चोपविष्टौ स्तः । गर्दभः (ii) __________ अवदत् — 'सखे ! उच्चैः शब्दं कृत्वा (iii) __________ जागरय ।' श्वा अवदत् — 'मम (iv) __________ चर्चां मा कुरु । कथं न जानासि त्वम् मया (v) __________ रक्षितोऽपि एष मह्यं भोजनदाने (vi) __________ ।' गर्दभः अवदत् — 'कार्यकाले मा याच ।' (vii) __________ अवदत् — 'स्वामिना अपि (viii) __________ कार्यकाले एव न भाषयितव्यः ।' गर्दभः सकोपम् अब्रवीत् — 'भवतु तावत्, अहमेव स्वामिनं जागरयामि ।' रजकस्तु गर्दभस्य चीत्कारं श्रुत्वा (ix) __________ तथा अताडयत् यत् स मृतः । सत्यमेव कथितम् — (x) __________ न कदापि अन्येन कर्त्तव्या ।

**मञ्जूषा**

| |
|---|
| पराधिकारचर्चा, कुक्कुरः, चौरः, गर्दभम्, सेवकः, भृशम्, कृपणः, श्वानम्, कर्मणः, स्वामिनम् । |

**3.** मञ्जूषातः पदानि गृहीत्वा स्वतन्त्रतादिवससमारोहस्य वर्णनम् संस्कृतेन पञ्चसु वाक्येषु कुरुत ।
मञ्जूषा से पदों को लेकर स्वतन्त्रता-दिवससमारोह का वर्णन संस्कृत में पाँच वाक्यों में कीजिए ।
Write five sentences in Sanskrit describing the Independence Day festival taking help from the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| पराधीनः, स्वतन्त्रः, रक्तदुर्गे, प्रधानमन्त्री, अगस्तमासस्य पञ्चदश तारिकायाम्, स्वाधीनता-संग्रामः, सन्देशम्, विभाजनम्, प्रतिज्ञा, राष्ट्रध्वजस्य, उत्तोलनम् । |

## खण्डः ग (SECTION C)

### पठितांश – अवबोधनम् संस्कृतसाहित्यस्य च परिचयः
### पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50* *अंकाः*

**4.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose-poetry and drama passages and answer the given questions in Sanskrit :

(क) **गद्यांशः**

ततो राजाऽवदत् — "भो ब्राह्मण ! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागतः । मया सर्वोऽपि ब्राह्मणसमूहो दक्षिणया तोषितः । तर्हि त्वमेतेषां रत्नानां मध्ये यत्तुभ्यं रोचते तद् गृहाणेति । ब्राह्मणेनोक्तम् — 'गृहं गत्वा गृहिणीं पुत्रं स्नुषां च पृष्ट्वा सर्वेभ्यो यद्रोचते तद् ग्रहीष्यामीति' । राज्ञोक्तं — 'तथा कुरु' । ब्राह्मणोऽपि स्वगृहमागत्य सर्वं वृत्तान्तं तेषामग्रेऽकथयत् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) ब्राह्मणः कं व्यतिक्रम्य समागतः ?

(ii) राज्ञा दक्षिणया कः तोषितः ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $1\times2=2$

(i) राज्ञा ब्राह्मणः किमुक्तः ?

(ii) ब्राह्मणः राजानं किमुक्तवान् ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2}\times4=2$

(i) 'समागतः' इति क्रियापदस्य कर्ता कः ?

(ii) 'पुत्रवधूम्' इति स्थाने किं पदं प्रयुक्तम् ?

(iii) 'प्रसादितः' अस्य कः पर्यायः अत्र प्रयुक्तः ?

(iv) 'गत्वा' अस्य किं विलोमपदमत्र प्रयुक्तम् ?

(ख) **पद्यांशः**

गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम् ।
इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्यो यस्य मित्रं न हि तस्य दूरम् ॥

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) कलापी कुत्र भवति ?

(ii) किं कस्माद् दूरं न भवति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $2\times1=2$

इन्दुः कियद्दूरे भवति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1\times2=2$

(i) द्विलक्षयोजनस्थाने किं पदमत्र प्रयुक्तम् ?

(ii) इन्दुः कस्य बन्धुः कथितः ?

(ग) **नाट्यांशः**

*पुरुषः* — धिक् चपल ! किमुक्तवानसि ? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति, तावत् त्वरितमनेन तरुगहनेनापसर्पत ।

*बटवः* — कुमार ! कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदम् । इतस्तदेहि । हरिणप्लुतैः पलायामहे ।

*लवः* — किं नाम विस्फुरन्ति शस्त्राणि ?

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times2=1$

(i) कुमार ! इति सम्बोधनं कस्मै प्रयुक्तम् ?

(ii) कुमारं के तर्जयन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. $2 \times 1 = 2$

कीदृशः चन्द्रकेतुः न आयाति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'दृप्ताम्' अस्य विशेष्यपदं किम् ?

(ii) 'पलायामहे' अस्याः क्रियायाः कर्तृपदं किम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान करके लिखिए ।
Match the words with their meanings and rewrite the same. $\frac{1}{2} \times 4 = 2$

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | विटपिनाम् | (i) | धारयन्ति |
| (ब) | चिबुकम् | (ii) | प्रेक्ष्यमाणः |
| (स) | कलयन्ति | (iii) | वृक्षाणाम् |
| (द) | निरूप्यमाणः | (iv) | हनुः |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत :
रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए :
Frame questions on the basis of the underlined words : $1 \times 4 = 4$

(i) <u>विश्वविजयिनां</u> क्षत्रियाणामूर्जस्वलः ।

(ii) <u>सौख्यैः</u> दुःखान्यपोहति ।

(iii) ब्राह्मणाय चत्वार्यपि <u>रत्नानि</u> ददौ ।

(iv) शिववीरचरः <u>निजकार्यात्</u> न विरमति ।

**7.** अधोलिखितभावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत :

निम्नलिखित दो भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थान पूर्ति कीजिए :

**Fill in the blanks in the following two explanations with the help of the words given in the box :** *3+3=6*

(अ) अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

भावार्थः

पण्डितराजजगन्नाथः अस्मिन् श्लोके हंसस्य वैशिष्ट्यं वदति — यद्यपि सर्वत्र (i) __________ शोभितं जलं (ii) __________ भवति, तथापि (iii) __________ चित्तं (iv) __________ विना कुत्रापि (v) __________ न (vi) __________ ।

(ब) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तटाकोदरसंस्थानां परीवाह इवाम्भसाम् ॥

भावार्थः

विक्रमो नाम राजा दानस्य महत्त्वं प्रकटयन् एव ब्रवीति — जनः स्वजीवने यद् (i) __________ अर्जति तस्य रक्षा तेषां (ii) __________ एव भवति । यतो हि (iii) __________ यदि जलम् (iv) __________ भवति तर्हि तेषां (v) __________ एव रक्षायाः (vi) __________ भवति ।

**मञ्जूषा**

| |
|---|
| सरोवरेषु, तडागेषु, धनम्, अधिकं, मानसरोवरम्, कमलैः, अन्यत्र, दानेन, निष्कासनम्, हंसस्य, रमते, उपायः । |

**8.** अधोलिखितयोः श्लोकयोः अन्वययोः रिक्तस्थानपूर्तिं कुरुत :

निम्नलिखित दोनों श्लोकों के अन्वयों में रिक्तस्थान-पूर्ति कीजिए :

**Fill in the blanks in the following prose-order-renderings of the two verses :** *$1\frac{1}{2}+1\frac{1}{2}=3$*

(अ) न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

अन्वयः

विद्वान् (i) __________ अज्ञानां कर्मसङ्गिनाम् बुद्धिभेदम् न (ii) __________ सर्वकर्माणि (iii) __________ ।

(ब) स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥

अन्वयः

विधात्रा अपण्डितानाम् (i) __________ छादनं विशेषतः सर्वविदां (ii) __________ मौनं स्वायत्तम् एकान्तगुणं (iii) __________ ।

**9.** यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb. *1+1=2*

(i) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।

(ii) अज्ञातेन मया रूक्षो व्यवहारः प्रदर्शितः ।

(ब) विशेषणपदं चिनुत ।
विशेषण पद चुनिए ।
Select the adjective. *1+1=2*

(i) जिजीविषेच्छतं समाः ।

(ii) ये के चात्महनो जनाः ।

(स) अधोलिखितपंक्तिषु रेखाङ्कित-सर्वनामपदानि केभ्यः प्रयुक्तानि ?
निम्नलिखित पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?
In the following lines for whom are the underlined pronouns used ? *1+1=2*

(i) उपदिश्यमानमपि <u>ते</u> न शृण्वन्ति ।

(ii) विक्रमार्को राजा यज्ञं करोति । <u>तेन</u> प्रेषितोऽहं त्वामाह्वातुं समागतः ।

(द) अधोलिखितपंक्तिभ्यां 'दुष्कर्मसु' तथा 'नीचैः' इति पदयोः समानार्थकपदे चित्वा लिखत :
निम्नलिखित पंक्तियों में से 'दुष्कर्मसु' एवं 'नीचैः' पदों के समानार्थक पद चुनकर लिखिए :
Select and write the synonyms of 'दुष्कर्मसु' and 'नीचैः' from the following lines : *1+1=2*

(i) क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।

(ii) समुद्रेभ्योऽधोभागे तिष्ठन्ति ।

(य) कः कं कथयति ?
कौन किसको कह रहा है ?
Who is saying this to whom ? *1+1=2*

(i) यद्रत्नं रत्नाभरणादिकं सूते तद् ग्राह्यम् ।

(ii) अधुना मम गमनसमयः आगत एव ।

**10.** (अ) अधोलिखितलेखकानाम् एकस्य एकस्य काव्यस्य नाम लिखत :

निम्नलिखित लेखकों के एक-एक काव्य का नाम लिखिए :

Write the names of one work each of the following poets : *1×5=5*

पण्डितराजजगन्नाथः, अम्बिकादत्तव्यासः, भर्तृहरिः, भारविः, कालिदासः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत :

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works : *1×5=5*

प्रबन्धपारिजातः, पाषाणी कन्या, समुद्रसङ्गमः, किरातार्जुनीयम्, महाभारतम् ।

## खण्डः घ (SECTION D)
## छन्दोऽलङ्काराः
## छंद एवं अलङ्कार
## Metres and Figures of Speech

*20 अंकाः*

**11.** (अ) प्रश्नान् उत्तरत ।

प्रश्नों के उत्तर दीजिए ।

Answer the questions. *1×4=4*

(i) रगणस्य उदाहरणं लिखत ।

(ii) 'संशये' इति पदे को गणः ?

(iii) 'वंशस्थम्' इति पदे 'श' वर्णो गुरुः लघुः वा ?

(iv) शार्दूलविक्रीडितच्छन्दसि प्रतिचरणं कति वर्णाः ?

(ब) अधोलिखितपरिभाषाः पूरयत :

निम्नलिखित परिभाषाओं को पूरा कीजिए :

Complete the following definitions : *1×3=3*

(i) रसै रुद्रैश्छिन्ना ______________________ ।

(ii) अनन्तरोदीरितलक्ष्मभाजौ ______________________ ।

(iii) उक्ता वसन्ततिलका ______________________ ।

(स) अधोलिखितचरणे किं छन्दः ?

निम्नलिखित चरण में कौनसा छन्द है ?

What is the metre in the following line ? *1*

मनसि वचसि काये पुण्यपीयूषपूर्णाः ।

(द) कस्यचिदेकस्य छन्दसः उदाहरणं लिखत ।

किसी **एक** छन्द का उदाहरण लिखिए ।

Write an example of any **one** of the following metres. *2×1=2*

उपजातिः, वंशस्थम् ।

**12.** (अ) अधोलिखितानाम् अलङ्काराणां परिभाषाः पूरयत :

निम्नलिखित अलङ्कारों की परिभाषाएँ पूरी कीजिए :

Complete the definitions of the following figures of speech : *1×4=4*

(i) रूपकं रूपितारोपो __________ ।

(ii) ____________ प्रकृतस्य परात्मना ।

(iii) ___________ अनेकार्थाभिधाने श्लेष इष्यते ।

(iv) ___________ वाक्यैक्य उपमा द्वयोः ।

(ब) कस्यचिदेकस्य अलङ्कारस्य उदाहरणं लिखत ।

किसी **एक** अलङ्कार का उदाहरण लिखिए ।

Write an example of any **one** of the following figures of speech. *3×1=3*

अर्थान्तरन्यासः, यमकम् ।

(स) अधोलिखितपंक्तिषु के अलङ्काराः ?

निम्नलिखित पंक्तियों में कौन-से अलङ्कार हैं ?

What are the figures of speech in the following lines ? *1×3=3*

(i) यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ।

(ii) विरला हि तेषामुपदेष्टारः ।

(iii) दिगन्तदन्तावलभयानकाकाराः ।